# Shri Krishnamangalam

# श्रीकृष्णमङ्गलम्

## Document Information

Text title : Shri Krishnamangalam 2

File name : kRRiShNamangalam2.itx

Category : vishhnu, krishna, mangala

Location : doc_vishhnu

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan

Latest update : August 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2022

*sanskritdocuments.org*

# श्रीकृष्णमङ्गलम्

मङ्गलं यादवेन्द्राय महनीयगुणाब्धये । (महनीयगुणात्मने) ।
वसुदेवतनूजाय वासुदेवाय मङ्गलम् ॥ १॥

किरीटकुण्डलभ्राजदलकैर्यन्मुखश्रिये ।
श्रीवत्सकौस्तुभोद्भासि वक्षसे चास्तु मङ्गलम् ॥ २॥

नीलाम्बुदनिकाशाय विद्युत्सदृशवाससे ।
देवकीवसुदेवाभ्यां संस्तुतायास्तु मङ्गलम् ॥ ३॥

ताभ्यां सम्प्रार्थितायाथ प्राकृतार्भकरूपिणे ।
यशोदाय गृहं पित्रा प्रापितायास्तु मङ्गलम् ॥ ४॥

पूतनाऽसुपयःपानपेशलायाऽसुरारिणे ।
शकटासुर विध्वंसि पादपद्माय मङ्गलम् ॥ ५॥

यशोदाऽऽलोकिते स्वास्ये विश्वरूपप्रदर्शिने ।
मायामानुषरूपाय माधवायास्तु मङ्गलम् ॥ ६॥

तृणावर्तदनूजासु हारिणे शुभकारिणे ।
वत्सासुरप्रभेत्रे च वत्सपालाय मङ्गलम् ॥ ७॥

दामोदराय वीराय यमलार्जुनपातिने ।
धात्रा हृतानां वत्सानां रूपधर्त्रेऽस्तु मङ्गलम् ॥ ८॥

ब्रह्मस्तुताय कृष्णाय कालीयफणनृत्यते ।
दावाग्निरक्षिताशेष गोगोपालाय मङ्गलम् ॥ ९॥

गोवर्धनाचलोद्धर्त्रे गोपी क्रीडाभिलाषिणे ।
अञ्जल्याऽऽहृतवस्त्राणां सुप्रीतायास्तु मङ्गलम् ॥ १०॥

सुदर्शनाख्य गन्धर्व शापमोक्षणकारिणे ।
शङ्खचूडशिरोहर्त्रे वृषभघ्नाय मङ्गलम् ॥ ११॥

गान्दिनीसुतसन्दृष्ट दिव्यरूपाय शौरिणे ।
त्रिवक्रया प्रार्थिताय सुन्दराङ्गाय मङ्गलम् ॥ १२॥

गन्धमाल्याम्बराढ्याय गजराजविमर्दिने ।
चाणूरमुष्टिकप्राणहारिणे चास्तु मङ्गलम् ॥ १३॥

कंसहन्त्रे जरासन्धबलमर्दन कारिणे ।
मथुरापुरवासाय महाधीराय मङ्गलम् ॥ १४॥

मुचुकुन्द महानन्ददायिने परमात्मने ।
रुक्मिणी परिणेत्रे च सबलायास्तु मङ्गलम् ॥ १५॥

द्वारकापुरवासाय हारनूपुरधारिणे ।
सत्यभामासमेताय नरकघ्नाय मङ्गलम् ॥ १६॥

बाणासुरकरच्छेत्रे भूतनाथस्तुताय च ।
धर्माहूताय यागार्थं शर्मदायास्तु मङ्गलम् ॥ १७॥

कारयित्रे जरासन्धवधं भीमेन राजभिः ।
मुक्तैः स्तुताय तत्पुत्र राज्यदायास्तु मङ्गलम् ॥ १८॥

चैद्यतेजोपहर्त्रे च पाण्डवप्रियकारिणे ।
कुचेलाय महाभाग्यदायिने तेऽस्तु मङ्गलम् ॥ १९॥

देव्यष्टक समेताय पुत्रपौत्रयुताय च ।
षोडशस्त्री सहस्रैस्तु संयुतायास्तु मङ्गलम् ॥ २०॥

यश्शिष्टरक्षणपरः करुणाम्बुराशिः
दुष्टासुरांशनृपतीन् विनिगृह्य शूरान् ।
कष्टां दशां अपनुदन्तरसा पृथिव्याः
पुष्टिं ददातु स हरिः कुलदैवतं नः ॥ २१॥

॥ इति श्रीकृष्णमङ्गलं सम्पूर्णम् ॥

Encoded and proofread by Aruna Narayanan

*Shri Krishnamangalam*

pdf was typeset on August 15, 2022

Please send corrections to *sanskrit@cheerful.com*